टट्टनी, स्त्री, (टट्ट इत्यव्यक्तशब्दं नयतीति। नी+क्विप्।) ज्येष्ठी। इति त्रिकाण्डशेषः॥

टट्टरी, स्त्री, (टट्टमित्यव्यक्तशब्दं रातीति। रा+कस्ततो ङीष्।) मृषावादः। लम्पावाद्यम्। पटहवाद्यम्। इति मेदिनी। रे, १५६॥

टट्टरः, पुं, (टट्ट इत्यव्यक्तशब्दं रातीति। रा+कः।) भेरीशब्दः। इति हेमचन्द्रः॥

टल, ज विक्लवे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) ज, टालः टलः। विक्लवो विह्वलीभावः। इति दुर्गादासः॥

टलनं, क्ली, (टल+भावे ल्युट्।) विक्लवः। टला इति भाषा॥

टा, स्त्री, (टलति प्रलये भूकम्पादौ वा। टल+ड टाप् च।) पृथिवी। इत्येकाक्षरकोषः॥

टाङ्करः, पुं, (टङ्कस्येदं टाङ्कम्। टङ्क+अण्। टाङ्कं रातीति। रा+कः।) नागवीटः। इति त्रिकाण्डशेषः॥

टारः, पुं, (टां पृथ्वीं ऋच्छतीति। ऋ+अण्।) लङ्गः। तुरङ्गः। इति हेमचन्द्रः॥

टिक, ऋ ङ गत्याम्। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) ऋ, अटिटिकत्। ङ, टेकते। इति दुर्गादासः॥

टिटिभकः, पुं, (टिटीत्यव्यक्तशब्दं भणति। भण+डः। ततः स्वार्थे कन्।) टिट्टिभपक्षी। इत्यमरटीका॥

टिट्टिभः, पुं, (टिट्टीत्यव्यक्तशब्दं भणतीति। भण+डः।) पक्षिविशेषः। टीठि इति भाषा। तत्पर्य्यायः। टीठिभकः २। इति शब्दरत्नावली॥ टिट्टिभकः ३। इत्यमरः।२।५।३५॥ टिट्टिभकः ४। इति तट्टीका॥ (यथा, मनुः। ५।११।

"अनिर्द्दिष्टांश्चैकशफांष्टिट्टिभञ्च विवर्ज्जयेत्॥")

त्रयोदशमन्वन्तरीयेन्द्रशत्रुदानवविशेषः। यथा,

"इन्द्रो दिवस्पतिः शत्रुष्टिट्टिभो नाम दानवः।

मायूरेण च रूपेण घातयिष्यति माधवः॥"

इति गारुडे ८७ अध्यायः॥

(वरुणसभास्थकदानवानामन्यतमः। असौ हि मर्त्तधर्म्मविवर्ज्जितः। यथा, महाभारते। २।९।१५।

"टिट्टिभो विटभूतश्च संह्रादश्चेन्द्रतापनः॥"

इत्युपक्रम्याह।

"सर्व्वे लब्धवराः शूराः सर्व्वे विगतमृत्यवः॥")

टिट्टिभकः, पुं, (टिट्टिभ+स्वार्थे कन्।) टिट्टिभपक्षी। इत्यमरः।२।५।३५॥

टिण्टिणिका, स्त्री, अम्लशिरीषिका। इति भावप्रकाशः॥

टिण्डिशः, पुं, वृक्षविशेषः। डिण्डिश। इति ढेँड्शी इति च भाषा। तत्पर्य्यायः। रोमशफलः २ तिन्दिशः ३ मुनिनिर्म्मितः ४। इति राजनिर्घण्टः॥ डिण्डिशः ५। अस्य गुणाः। रुचिकारित्वम्। भेदकत्वम्। पित्तश्लेष्माश्मरीनाशित्वम्। सुशीतत्वम्। वातलत्वम्। रूक्षत्वम्। मूत्रलत्वञ्च। इति भावप्रकाशः॥

टिप, क नुदि। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, टेपयति। नुदि प्रेरणे। इति दुर्गादासः।

टिप्पनी, स्त्री, (टेपयति व्याख्यायतेऽनया। टिप+करणे ल्युट् ङीप् च। पृषोदरादित्वात् पस्य द्वित्वे साधुः।) टीका। यथा,—

"श्रीमतङ्गाननं नत्वा लीलावत्याः सुटिप्पनी।

भवेशेन सुबोधार्थं क्रियते यद्गुरोः श्रुतम्॥")

टीक, ऋ ङ गत्याम्। इति कविकल्पद्रुमः। (भ्वां-आत्मं-सकं-सेट्।) ऋ, अटिटीकत्। ङ, टीकते। इति दुर्गादासः॥

टीका, स्त्री, (टीक्यते गम्यते प्रविश्यते ज्ञायते वानया। टीक+घञर्थे कः। टाप् च।) विवरणग्रन्थः। इति लिङ्गादिसंग्रहे अमरः॥

टुण्टुकः, पुं, श्योणाकवृक्षः। इत्यमरः।२।४।५६॥ कृष्णखदिरवृक्षः। इति शब्दचन्द्रिका॥ (टुण्टु इत्यव्यक्तशब्देन कायति शब्दायते इति। कै+कः।) पक्षिविशेषः। इति शब्दरत्नावली॥ टुण्टुनि इति भाषा। श्योनाकप्रभेदः। इति राजनिर्घण्टः॥

टुण्टुकः, त्रि, नीचः। इति मेदिनी॥ क्रूरः। इति विश्वः॥

टुण्टुका, स्त्री, टङ्गिणीवृक्षः। इति शब्दचन्द्रिका॥

टुनाका, स्त्री, तालमूलीवृक्षः। इति शब्दचन्द्रिका॥

टेरकः, त्रि, वक्रचक्षुः। टेरा इति भाषा। तत्पर्य्यायः। वलिरः २ केकरः ३ केदरः ४। इति शब्दरत्नावली॥

ट्वल, ज विक्लवे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) वकारयुक्तः। ज, ट्वालः ट्वलः। विक्लवो विह्वलीभावः। इति दुर्गादासः॥

---

## ठ

ठ, ठकारः। स व्यञ्जनद्वादशवर्णः टवर्गद्वितीयवर्णश्च। (अर्द्धमात्राकालेनोच्चार्य्योऽयं वर्णः।) अस्योच्चारणस्थानं मूर्द्धा। इति व्याकरणम्॥ (अस्योच्चारणे जिह्वामध्येन मूर्द्धस्थानस्पर्शः आभ्यन्तरप्रयत्नः। विवारश्वासघोषा महाप्राणश्च वाह्यप्रयत्नाः। वङ्गवर्णमालायाम्) तस्य लेखनप्रकारो यथा,—

"वार्त्ताकुवर्त्तुलाकारो रेखाधिष्ठितदेवताः।

तिष्ठन्ति क्रमतो नित्यं चन्द्रसूर्य्याग्नयः प्रिये!॥

मात्राहीनस्तूर्द्ध्वशिखष्ठकारः परमेश्वरि!॥

ध्यानमस्य प्रवक्ष्यामि शृणुष्व कमलानने!।

पूर्णचन्द्रप्रभां देवीं विकसत्पङ्कजेक्षणाम्॥

सुन्दरीं षोड़शभुजां धर्म्मकामार्थमोक्षदाम्।

एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्॥"

इति तन्त्रोद्धारतन्त्रम्॥ * ॥

अस्य स्वरूपं यथा, कामधेनुतन्त्रे।

"ठकारं चञ्चलापाङ्गि! कुण्डली मोक्षरूपिणी।

पीतविद्युल्लताकारं सदा त्रिगुणसंयुतम्॥

पञ्चदेवात्मकं वर्णं पञ्चप्राणमयं सदा।

त्रिबिन्दुसहितं वर्णं त्रिशक्तिसहितं सदा॥"

तस्य ३१ एकत्रिंशन्नामानि यथा,—

"ठः शून्यो मञ्जरी बीजः पाणिनी लाङ्गली क्षया।

वनजो नन्दनो जिह्वा सुनङ्गो घूर्णकः सुधा॥

वर्त्तुलः कुण्डलो वह्निरमृतं चन्द्रमण्डलः।

दक्षजानूभवश्च देवभक्षो बृहद्ध्वनिः॥

एकपादो विभूतिश्च ललाटं सर्व्वमित्रकः।

वृषघ्नो नलिनी विष्णुर्म्महेशो ग्रामणीः शशी॥"

इति नानातन्त्रशास्त्रम्॥

ठः, पुं, शिवः। महाध्वनिः। चन्द्रमण्डलः। इत्येकाक्षरकोषः॥ मण्डलः। शून्यम्। लोकगोचरः। इति मेदिनी। ठे, १॥

ठक्कुरः, पुं, देवता। ठाकुर इति ख्यातः। यथा,

"श्रीदामनामगोपालः श्रीमान् सुन्दरठक्कुरः॥"

इत्यनन्तसंहिता॥

ठठं / ठठठं } व्य, अनुकरणशब्दः। ठन् ठन् इति भाषा। यथा, महानाटके। ९६।

"रामाभिषेके मदविह्वलायाः

कक्षाच्युतो हेमघटस्तरुण्याः।

सोपानमासाद्य चकार शब्दं

ठठं ठठं ठं ठठठं ठठं ठः॥"

ठेरः, त्रि, वृद्धः। यथा, जा ठेरं व्व हसन्ती। इति काव्यप्रकाशे देशीभाषा॥

---

## ड

ड, डकारः। स व्यञ्जनत्रयोदशवर्णः टवर्गतृतीयवर्णश्च। अस्योच्चारणस्थानं मूर्द्धा। इति व्याकरणम्॥ (यथा, शिक्षायाम्। १७।

"स्युर्मूर्द्धन्या ऋटुरषा दन्त्या लृतुलसाः स्मृताः॥")

वङ्गीयवर्णमालायामस्य लेखनप्रकारो यथा,

"ऊर्द्ध्वाधःक्रमतो रेखा मध्ये त्वाकुञ्चिता तथा।

लक्ष्मीर्व्वाणी भवानी च क्रमशस्तत्र संस्थिता॥

ब्रह्मरूपा तथा मात्रा महाशक्तिः प्रकीर्त्तिताः।

ध्यानमस्य प्रवक्ष्यामि शृणुष्वावहिता मम।

जवासिन्दूरसङ्काशां वराभयकरां पराम्॥

त्रिनेत्रां वरदां नित्यां परमोक्षप्रदायिनीम्।

एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्॥"

इति वर्णोद्धारतन्त्रम्॥ * ॥

अस्य स्वरूपं यथा, कामधेनुतन्त्रे।

"डकारं चञ्चलापाङ्गि! सदा त्रिगुणसंयुतम्

पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा॥

त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं सदा।

चतुर्ज्ञानमयं वर्णं आत्मादितत्त्वसंयुतम्॥

पीतविद्युल्लताकारं डकारं प्रणमाम्यहम्।"

तस्य २४ चतुर्विंशतिनामानि यथा,—

"डः स्मृतिर्द्दारुको नन्दिरूपिणी योगिनीप्रियः।

कौमारी शङ्करस्त्रासस्त्रिवक्रो नदको ध्वनिः॥